स्फोटयति गात्रं बाणः । विसरण इति दन्त्य-मध्यपाठे विकसन इत्यर्थः । स्फोटति मल्लिका-कलिका ॥

स्फुट, क भिदि । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) क, स्फोटयति कण्टकः पदम् । इति दुर्गादासः ॥

स्फुट, ङ विसरणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ, स्फोटन्ते नवकुड्म-लानि कुटजप्रायेषु वनेष्विति हलायुधः । इति दुर्गादासः ॥

स्फुट, त् क विसरणे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-अक०-सेट् ।) विसरणं विकसनम् । स्फुटयति चम्पककलिका । अपु-स्फुटत् । इति दुर्गादासः ॥

स्फुट, शि विकासे । इति कविकल्पद्रुमः । (तुदा०-पर०-अक०-सेट् ।) विकास इति कस ज गताविति दन्त्यान्तस्य घञि रूपं विपूर्व्वेणार्था-न्तरवाचितया विकसनमित्यर्थः । शि, स्फुटति केतकीकोरकः । अस्फुटीत् पुष्पौघः । इति दुर्गादासः ॥

स्फुट, क हिंसे । आङ्पूर्व्वोऽयम् । इति कविकल्प-द्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) आङ् उप-सर्गः । क, आस्फोटयति । इति दुर्गादासः ॥

स्फुटः, त्रि, (स्फुटति प्रकाशते इति । स्फुट्+कः ।) व्यक्तः । यथा, रघुः । ३ । ६३ ।

"अवेहि मां प्रीतमृते तुरङ्गमात्
किमिच्छसीति स्फुटमाह वासवः ॥")

प्रफुल्लः । इति मेदिनी ॥ शुक्लः । इत्यजयः ॥ भिन्नः । इति स्फुटधात्वर्थदर्शनात् ॥ * ॥ स्फुट-ग्रहा यथा,—

"स्यात् संस्कृतो मध्यफलेन मध्यो
मन्दस्फुटः स्यात् चलकेन्द्रमुक्तम् ।
विधाय शैघ्र्येण चलेन चैवं
खेटस्फुटः स्यादसकृत् फलाभ्याम् ॥"

कुजस्य विशेषमाह ।

"दलीकृताभ्यां प्रथमं फलाभ्यां
ततोऽखिलाभ्यामसकृत् कुजस्तु ।
स्फुटौ रवीन्दू मृदुनैव वेद्यौ
शीघ्राख्यतुङ्गस्य तयोरभावात् ॥"

इति सिद्धान्तशिरोमणिः ॥

स्फुटनं, क्ली, (स्फुट्+ल्युट् । कुटादित्वात् न गुणः ।) विदारणम् । इत्यमरः । ३ । २ । ५ ॥ विक-सनम् । इति स्फुटधात्वर्थदर्शनात् ॥

स्फुटबन्धनी, स्त्री, (स्फुटं बन्धनं यस्याः । ङीष् ।) पारावतपदी । नफट्को इति भाषा । इति रत्नमाला ॥ स्फुटवल्कलीति केचित् ॥

स्फुटा, स्त्री, (स्फुटति विकाशते इति । स्फुट+कः । टाप् ।) फटा । फणा । इत्यमरटीकायां रामाश्रमः । ३ । २ । ५ ॥

स्फुटिः, स्त्री, (स्फुटतीति । स्फुट+इन् ।) पाद-स्फोटरोगः । निर्भिन्नकर्कटीफलम् । इति मेदिनी ॥

स्फुटितः, त्रि, (स्फुट+क्तः ।) विकसितः । इति हेमचन्द्रः ॥ भिन्नः । (यथा, मृच्छकटिके ३ अङ्के ।

"असदृशजनसंप्रयोगभीरो-
र्हृदयमिव स्फुटितं महाम्बरस्य ॥")

परिहसितः । इति स्फुटधात्वर्थदर्शनात् । व्यक्तीकृतः । इति स्फुटशब्दार्थदर्शनात् ॥

स्फुटी, स्त्री, (स्फुटि+कृदिकारादिति ङीष् ।) पादस्फोटरोगः । कर्कटीफलम् । फुटी इति भाषा । इति शब्दरत्नावली ॥

स्फुट्ट, क अनादरे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, स्फुट्टयति । इति दुर्गा-दासः ॥

स्फुण्ड, इ क नर्म्मणि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) नर्म्म इह परीहासः । इ क, स्फुण्डयति सखायं लोकः । पुस्फुण्डयिषति । आद्यस्वरौ इति कातन्त्राद्याः । पञ्चमस्वरयुक्तौ नर्णौ । इति गोविन्दभट्टः । इति दुर्गादासः ॥

स्फुण्ड, इ ङ फुल्ले । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) फुल्लं विकसनम् । इ, स्फुण्ड्यते । ङ, स्फुण्डते कुन्दकोरकः । पुस्फुण्डे । इति दुर्गादासः ॥

स्फुड, शि वृत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) शि, स्फुडति । अस्फुडीत् । पुस्फोड । वृत्यां वरणे । इति दुर्गादासः ॥

स्फुत्करः, पुं, (करोतीति । कृ+अच् । स्फुदित्य-व्यक्तशब्दस्य करः ।) अग्निः । इति शब्द-चन्द्रिका ॥

स्फुत्कारः, पुं, फुत्कारः । स्फुदिति क्रियते इति स्फुत्शब्दपूर्व्वकृधातोर्भावे घञ्प्रत्ययेन निष्पन्नः ॥

स्फुर, शि स्फूर्त्तौ । चले । इति कविकल्पद्रुमः ॥ (तुदा०-चुरा०-पर०-अक०-सेट् ।) स्फूर्त्तिः प्रकाशः । चलस्खलनम् । शि, स्फुरति चामरम् । अस्फुरीत् । पुस्फोर । इति दुर्गादासः ॥

स्फुरः, पुं, (स्फुरतीति । स्फुर+कः ।) फलकम् । इति हेमचन्द्रः ॥ (स्फुर+भावे घञ् ।) स्फुरणम् । इत्यमरटीका । ३ । २ । ८ ॥

स्फुरणं, क्ली, (स्फुर+ल्युट् ।) किञ्चिच्चलनम् । इति भरतः ॥ तत्पर्य्यायः । स्फरणम् २ । इत्य-मरः । ३ । २ । ८ ॥ स्फुलनम् ३ स्फोरणम् ४ स्फुरः ५ स्फुरः ६ स्फारणम् ७ । इति तट्टीका ॥ स्फूर्त्तिः । इति शब्दरत्नावली ॥ * ॥ अङ्ग-स्फुरणस्य शुभाशुभफलं यथा,—

"मूर्ध्नोऽधुनाङ्गस्फुरितस्य सम्यक्
प्रत्येकमव्यक्तफलप्रभावम् ।
सर्व्वं च यथावन्ति स्वदेहा-
दुत्पद्यते कर्म्मविपाकसंवित् ॥
मूर्द्ध्नि स्फुरत्याशु पृथिव्यवाप्तिः
स्थानप्रवृत्तिश्च ललाटदेशे ।
भ्रूघ्राणमध्ये प्रियसङ्गमः स्यात्
नासाक्षिमध्ये च सहायलाभः ॥
दृगन्तमध्यस्फुरणेऽर्थलाभोत्-
कण्ठौ क्रमाद्विस्फुरिते दृगादौ ।
जयो दृशाधःस्फुरणे रणः स्यात्
प्रियश्रुतिः स्यात् स्फुरिते च कर्णे ॥
योषित्समृद्धिः स्फुरिते च गण्डे
घ्राणे तु सौमुख्यमुदौ भवेताम् ।
भोज्येष्टसङ्गावधरोष्ठयोश्च
स्कन्धे गले भोगविवृद्धिलाभौ ॥
स्कन्धौ भुजस्येष्टसमागमाय
स्कन्धः करस्य द्रविणाप्तहेतुः ।
स्कन्धश्च पृष्ठस्य पराजयाय
स्कन्धौ जयायोरसि मानवानाम् ॥
पार्श्वप्रकम्पे विषयस्य लाभः
कटिप्रकम्पे तु बलप्रमोदौ ।
नाभिप्रकम्पे निजदेशलाभः
धनर्द्धिबन्धुश्च भुवि प्रकम्पे ॥
दुःखं धनाप्तं हृदयस्य कम्पे
स्फिक्पायुकम्पेऽपि च वाहनाप्तिः ।
वराङ्गकम्पे वरयोषिदाप्ति-
र्मुष्के सकम्पे तनयस्य जन्म ॥
वस्तौ सकम्पे युवतिप्रवृत्तिः
दोषश्च कम्पे पुनरूरुपृष्ठे ।
ऊरः पुनः स्यात् सुसहायलाभः
स्याज्जानुकम्पे त्वचिरेण सिद्धिः ॥
जङ्घाप्रकम्पे निजदेशनाशः
स्थानाभिवृद्धिश्चरणस्य कम्पे ।
दाता सलाभाङ्घ्रितलप्रकम्पे
पुंसां सदा दक्षिणदेहभागे ॥
स्त्रीणाञ्च वामावयवे प्रजातः
स्कन्दः फलानि प्रदिशत्यवश्यम् ॥"

इति वसन्तराजशाकुने नरेङ्गितेऽङ्गस्फुरण-प्रकरणं चतुर्थम् ॥

स्फुरणा, स्त्री, (स्फुर+णिच्+युच् । टाप् ।) स्फुरणम् । इत्यमरटीका । ३ । २ । १० ॥

स्फुरन्, [त्] त्रि, (स्फुर+शतृ ।) कम्पनयुक्तः । स्फूर्त्तिविशिष्टः । यथा,—

"गङ्गोत्तुङ्गतरङ्गमङ्गजटाजूटाग्रजाग्रत्फणि-
स्फूर्जत्फुत्कृतिभीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा ।
आनन्दामृतवापिकां विदधती चित्तं गिरीश-
प्रभो-
स्त्वां पायान्नवसङ्गमे भगवती लज्जावती
पार्व्वती ॥"

इति काव्यचन्द्रिका ॥

स्फुरितं, क्ली, (स्फुर+क्तः ।) स्फुरणम् । स्फुरण-विशिष्टे, त्रि । यथा । मूर्ध्नोऽधुनाङ्गस्फुरिते च सम्यक् इति । प्रिया श्रुतिः स्यात् स्फुरिते च । कर्णे इति च । वसन्तराजशाकुनम् ॥

स्फुर्च्छ, आ विस्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) क्विपि राद्धोर्लोपे स्फूः स्फुरौ स्फुरः । आ स्फूर्च्छितं स्पूर्णं तेन । स्फूर्च्छति कथां मद्यपः । इति दुर्गादासः ॥